# bhAtu bhAratam

# ભાતુ ભારતમ્

## Document Information

Text title : bhAtubhAratam

File name : bhAtubhAratam.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vaidyaH rAmasvarUpa shAstrI

Transliterated by : Srinivas Kommireddy srinivas.kommireddy at googlemail.com

Proofread by : Srinivas Kommireddy

Source : Divya Jyoti Sanskrit Magazine September 1966

Latest update : December 6, 2015

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 29, 2021

*sanskritdocuments.org*

# ભાતુ ભારતમ્

મુનિભિરર્ચિતં દેવપૂજિતં શ્રુતિભિરૂર્જિતં શાસ્ત્રચર્ચિતમ્ ।
પ્રકૃતિભૂષિતં જ્ઞાનસુન્દરં ધરણિગૌરવં ભાતુ ભારતમ્ ॥ ૧॥

સુરસરિત્તટં સિન્ધુશોભિતં રુચિરપર્વતં કાન્તકાનનમ્ ।
કૃષકસઙ્કુલં  સસ્યશ્યામલં વિપુલગોબ્રજં ભાતુ ભારતમ્ ॥ ૨॥

વિવિધબોધદૈઃ સૂરિભિશ્શ્રિતં વિમલબુદ્ધિભિર્ક્ષાનિભિર્યુતમ્ ।
વિતતકીર્તિભિઃ કોવિદૈઃ સ્તુતં કરુણમાનસં ભાતુ ભારતમ્ ॥ ૩॥

હરિનિષેવિતં રામપાવિતં મુરધરક્ષિતં વ્યાસવર્ણિતમ્ ।
ત્રિદશગોગુરુર્બ્રાહ્મણપ્રિયં રચિતરાષ્ટ્રકં ભાતુ ભારતમ્ ॥ ૪॥

વિદિતસંસ્કૃતં ખ્યાતકૌશલં વિભવમણ્ડિતં ત્યાગપણ્ડિતમ્ ।
પ્રયતમાનુષં સ્વર્ણભૂતલં સકલસુન્દરં ભાતુ ભારતમ્ ॥ ૫॥

નિહિતપાકિકં ચીનજિત્વરં નિરતરૂસકં સ્વસ્ય રક્ષકમ્ ।
વિપુલસમ્પદં ધર્મતત્પરં પ્રથિતવિક્રમં ભાતુ ભારતમ્ ॥ ૬॥

સરલસૂનૃતં ગ્રામ્યજીવનં પરમભાવુકં ભવ્યમન્દિરમ્ ।
અનઘકેતુકં સ્વીયશાસનં ભુવનવન્દિતં ભાતુ ભારતમ્ ॥ ૭॥

– વૈદ્યઃ રામસ્વરૂપ શાસ્ત્રી

Encoded and proofread by Srinivas Kommireddy
srinivas.kommireddy at googlemail.com

*bhAtu bhAratam*

pdf was typeset on November 29, 2021

Please send corrections to *sanskrit@cheerful.com*